RKMVERI/DSP/BMAIS/2018-23/J2022/SK-104

# SK-104 बृहदारण्यकोपनिषद् सशाङ्करभाष्या (3,4)

कालावधिः - होराद्वयम् पूर्णांकाः -50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) याज्ञ्यवल्कीयकाण्डस्य कुतो न पुनरुक्तता ?
2) विज्ञानोपायः शास्त्रेषु कः दृष्टः ?
3) पारिक्षिताः क्व अभवन् ?
4) शोको नाम कः ?
5) आपः कस्मिन्नोताश्च प्रोताश्च ?
6) गार्गीब्रह्मणं कतमम् ?
7) अस्थूलमनणु - इति श्रुतिवाक्यं कस्मिन् ब्राह्मणे वर्तते ?
8) यं पृथिवी न वेद इत्यस्य कोऽर्थः ?
9) पश्चिमदिशः का देवता ?
10) उत्तरदिशः का देवता ?
11) दक्षिणदिशः का देवता ?
12) यः एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति .... पूरयत।

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) अहोरात्रादिरूपात् कालात् मुक्तिसाधनं किम् ?
2) गार्ग्याः प्रश्नद्वयविषयिणीं प्रतिज्ञामात्रं लिखत।
3) देवताप्रतिष्ठासहितां पूर्वां दिशं वर्णयत।
4) जनकस्य गोदानविषयिणीं प्रतिज्ञां लिखत।
5) ब्रह्मणः यज्ञरक्षणसाधनं तत्फलं च विचारयत।
6) देवताप्रतिष्ठासहितां पश्चिमाम् दिशं वर्णयत।
7) देवताप्रतिष्ठासहिताम् ऊर्ध्वां दिशं वर्णयत।

C) **यथेष्टं त्रयाणां उत्तरं लिखत।** **5x3=15**

1) गन्धादीनाम् अतिग्रहत्वं समन्त्रकं व्याख्यात।
2) पारिक्षिताः क्व अभवन् इति विचारयत।
3) आत्मज्ञानस्य सन्न्याससहितत्वं विवेचयत।
4) याज्ञ्यवल्क्यारुणिसंवादे आरुणेः प्रश्नं प्रस्तूयत।
5) प्राणस्य अष्टौ भेदान् निरूपयत।

D) **दीर्घप्रश्नैकम् उत्तरत ।** **10x1=10**

1) अन्तर्यामिब्राह्मणसारं लिखत।
2) अनुमानेन अक्षरं ब्रह्म निरूपयत।

***

# SK-105 तैत्तिरीयोपनिषत् शाङ्करभाष्योपेता

समयः होराद्वयम् पूर्णाङ्कः ५०

---

A) **यथेच्छं पञ्च प्रश्नान् उत्तरत।** **1x5=5**

1) अनुशासनश्रुतिः का?
2) व्याहृतित्रयं किम्?
3) ब्रह्मविद्यायां लब्धायां कर्मनैष्कञ्चन्यबोधिके द्वे श्रुती लिखत।
4) ब्रह्मानन्दवल्ल्यां किं सूत्रभूतं वाक्यम्?
5) किं सत्यम्? किं वा अनृतम्?
6) तैत्तिरीयोपनिषदः प्रथमवल्ल्याः काभिधा, तत्र च अनुवाकाः कियन्तः सन्ति?
7) विशेषणस्य कीदृशं व्यवच्छेदकत्वम्?

B) **अधोलिखितेषु त्रयाणां मन्त्राक्षराणामर्थं लिखत।** **1x3=3**

1) शीक्षा
2) वस्यसः
3) आयुक्ताः
4) गुहा

C) **अधोलिखितेषु यथेच्छं द्वौ मन्त्रौ पूरयत।** **1x2=2**

1) यश्छन्दसामृषभो विश्वरूपः.......आवहन्ती वितन्वाना।
2) शन्नो मित्रः शं वरुणः.....शान्तिः शान्तिः शान्तिः।

D) **यथेच्छं पञ्च प्रश्नान् उत्तरत।** **3x5=15**

1) अन्नशब्दस्य निर्वचनं प्रदर्शयत।
2) मोक्षकारणमीमांसायां विकल्पपञ्चकमुल्लिखत।
3) प्राणमयकोशं व्याख्यात।
4) उपनिषच्छब्दस्य निरुक्तिः प्रदर्शनीया।
5) आसनेन प्रश्वसितव्यम् इत्यत्र आसनशब्दार्थं व्याख्यात।
6) "प्रतिवेशोऽसि प्र मा पाहि प्र मा पद्यस्व" इत्यस्य मन्त्रस्य कोऽर्थः?
7) विज्ञानमयकोशं व्याख्यात।

E) **अधोलिखितेषु यथेच्छं प्रश्नत्रयमुत्तरत।** **5x3=15**

1) "एवमेता महासंहिताः व्याख्याता" व्याख्यात।

2) कर्मणां मोक्षसाधनत्वं कथं न स्यात्?

3) ओङ्कारस्य सर्वात्मत्वं प्रतिपादयत।

4) पञ्च कोशान् संक्षेपेण तैत्तिरीयभाष्यदिशा प्रतिपादयत।

5) अधीतवेदस्य कर्तव्यतां निरूपयत॥

F) **कस्यचिदेकस्य लघुप्रबन्धः विरचनीयः।** **10x1=10**

1) "सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रांशं विस्तारेण तैत्तिरीयभाष्यदिशा व्याख्यात।

2) ओङ्काराच्छ्रियः प्रार्थना कथं विहिता तैत्तिरीयके।

***

RKMVERI/DSP/BMAIS//17-22/J2022/SK-106

## SK-106 माण्डूक्यकारिकाभाष्यम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **दश प्रश्नाः समाधेयाः।** **1x10=10**

1) मङ्गलश्लोकयोः आत्मस्वरुपप्रतिपादने प्रकारभेदः कः?
2) अभिधानप्राधान्येन निर्दिष्टस्य अभिधेयप्राधान्येन निर्देशः किमर्थः?
3) स्वप्नवज्जाग्रद्भावानां मिथ्यात्वसाध्यकानुमानं लिखत।
4) वेदान्तेषु विश्वमिदं विचक्षणैः किमिव दृष्टम्?
5) अज्ञस्य आत्मनो मालिन्यं किमिव?
6) “यया सम्मोहितः स्वयं ______________ कारिकायाः पूर्वांशं विलिख्य पूरयत।
7) तृप्तित्रैविध्यबोधिकां कारिकां लिखत।
8) ग्रन्थे मनोनिग्रहोपायः कः प्रदर्शितः?
9) “अस्पर्शयोगो वै नाम” — अत्र अपर्शयोगः कः? पदार्थं वर्णयत।
10) मृल्लोहविस्फुलिङ्गाद्यैः __________________ पूरयत।
11) “च्यवन्ते तन्मनीषया” - अत्र मनीषा शब्दार्थः कः?
12) असतो नासदुत्पद्यते - प्रतिपादिका कारिका का?

B) **पञ्चानाम् उत्तरं लिखत।** **3x5=15**

1) प्रत्यगात्मनश्चतुश्पात्त्वे प्रकृते द्युलोकादीनां मूर्धत्वादिकथनम् उपपपन्नमेव; विमृशत।
2) “प्रपञ्चो यदि विद्येत _________ – कारिकामिमां यथाभाष्यं स्पष्टयत।
3) आकाशवत् रूपकार्यसमाख्याभेदेऽपि जीवेषु न स्वरुपतो भेदः - इममर्थं साधयत।
4) तुरीयस्य कार्यकारणाभ्याम् अबद्धत्वं कारिकानुसारं प्रदर्शयत।
5) द्वयकालत्वविशेषस्य सत्यत्वापादकत्वं निराकुरुत।
6) यतिः कर्या चर्यया लोकमाचरेत्? कारिकां विलिख्य स्पष्टयत।
7) “अद्वैतं परमार्थो हि” - कारिकार्थं संक्षिपत।

C) **पञ्चसु त्रीन् उत्तरत।** **5x3=15**

1) यथाभाष्यं आत्मनो द्वितीयपादं निरुपयत।

2) जीवकल्पना किंनिमित्ता? दृष्टान्तेन प्रतिपादयत।

3) ब्रह्मण अकार्पण्यं हेतुदृष्टान्ताभ्यां साधयत।

4) “अपूर्वं स्थानिधर्मो हि” - एतदनुसारं साध्यवैकल्यमाशङ्क्य परिहरत।

5) द्वैतिनां परस्परविरोधप्रदर्शनेन अद्वैतं निर्दुष्टं स्थापयत।

D) **यथेच्छमेकं लिखत।** **10x1=10**

1) “दक्षिणाक्षिमुखे विश्वः________ – इति कारिकाभाष्यं वर्णयत।

2) “न निरोधो न चोत्पत्तिः ________ - कारिकेयं यथाभाष्यं व्याख्यातव्या।

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK-107

# SK-107 केनोपनिषत् ऐतरेयोपनिषच्च शांकरभाष्यसहिता

कालावधिः- होराद्वयम् पूर्णाङ्काः- ५०

---

A) **अधः यथाकामं पञ्चमन्त्रान् पूरयत्।** **1x5=5**

1) ब्रह्म ह देवेभ्यो __________।
2) स ईक्षतेमे नु लोका________।
3) श्रोत्रस्य श्रोत्रं ________।
4) स एतमेव सीमानं विदार्य _________।
5) प्रतिबोधविदितं मतम् ________।
6) स तस्मिन्नेवाकाशे _________।
7) तत्स्त्रिया आत्मभूतं ________।

B) **वाक्येनैकेन नीचैः प्रदत्तेषु पञ्चानामुत्तरं लिखत।** **1x5=5**

1) यक्षशब्दस्य कोऽर्थः?
2) तपः नाम किम्?
3) अमूर्च्छयत् इति शब्दस्य कोऽर्थः?
4) ब्रह्म वनम् इति कथमुच्यते?
5) प्रजापतेः पुत्रस्य नाम किम्?
6) ब्रह्मजिज्ञासायां कः अधिकारी?
7) सूत्रात्मा इति कस्य नामधेयम्?

C) **यथारुचि इह पञ्च समाधत्त।** **3x5=15**

1) 'श्रोत्रस्य श्रोत्रम्' इत्यस्य मन्त्रस्यार्थं संक्षेपेण लिखत।
2) प्रतिष्ठाशब्दस्य अर्थद्वयं यथाभाष्यं लिखत।
3) उपनिषच्छब्दार्थं संक्षेपेण विवृणुत।
4) उमोपदेशस्य आशयं लिखत।
5) 'स एवं विद्वानस्माच्छरीरभेदात्' इत्यादिमन्त्रोक्तां वामदेवगतिं संक्षेपेण लिखत।

6) ब्रह्मणः अधिदैवतोपदेशं निरूपयत।

D) **यथामन्त्रं निम्नदर्शितेषु त्रयः समाधेयाः।** **5x3=15**

1) ‘उक्ता ते उपनिषद्’ इत्यादिमन्त्रे अवधारणपदस्य अर्थं यथाभाष्यं लिखत।

2) ‘ब्रह्म ह देवेभ्यो विजिग्ये’ इत्यादिमन्त्रार्थं विशदयत।

3) ‘यस्यामतं तस्य मतम्’ इत्यादिमन्त्रार्थं विवृणुत।

4) ‘प्रतिबोधविदितं मतम्’ इत्यादिमन्त्रस्य आशयं यथाभाष्यं लिखत।

E) **अधो विलिखितयोः एकं समाधत्त।** **10x1=10**

1) आत्मनः सर्वान्तर्यामित्वं सर्वनियन्तृत्वं च केनोपनिषदनुसारेण व्याख्यात।

2) ब्रह्मविद्यायाः कर्मशेषत्वं न सम्भवति इत्यस्मिन् विषये विचारम् उपस्थापयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK-126

# SK-126 भगवद्गीता

कालावधिः - होराद्वयम्                                                                                   पूर्णाङ्काः – 50

---

A) **अधोलिखितेषु षट् प्रश्नाः समाधेयाः।** **1x6=6**

1) संसारस्य ऊर्ध्वमूलत्वं कथम् ?
2) संसारवृक्षं छित्वा किं कर्तव्यम् ?
3) विभूतिसंक्षेपप्रतिपादनस्य किं प्रयोजनम् ?
4) ईश्वरस्य "पुरुषोत्तम" – इति एतन्नामनिर्वचनप्रसिद्धिं दर्शयत।
5) दोषवत् - अत्र 'दोषवत्' शब्दार्थः कः?
6) राजसः त्यागः कीदृशः?
7) "यज्ञदानतपः कर्म" - न त्याज्यं कुतः?
8) दुर्मतित्वेन अष्टादशे कोऽभिमतः?
9) "भक्त्या मामभिजानाति" - अत्र भक्तिः का?

B) **त्रयः प्रश्नाः समाधेयाः।** **3x3=9**

1) संसारस्वरुपप्रतिपादनस्य प्रयोजनं किम् ? विशदयत।
2) शरीरादिभ्यो व्यतिरिक्तत्वम् आत्मनः प्रतिपादयत।
3) सन्यासत्यागशब्दयोः अर्थं निर्णीय लिखत।
4) का नाम सात्विकी बुद्धिः? दर्शयत।
5) कर्मणः फलम् अत्यागिनामेव भवति प्रेत्य न त्यागिनां। साधयत।

C) **द्वयोरुत्तरं लिखत।** **5x2=10**

1) परिमार्गितव्यत्वेन उपदिष्टं पदं निरुपयत।
2) "तत्रैवं सति कर्तारम् __________" - श्लोकं व्याख्यात।
3) विभूतिसंक्षेपं समासेन विलिख्य तत्प्रयोजनं लिखत।
4) त्यागविषये भगवतो निश्चितमुत्तमं मतं लिखत।

D) **यथेष्टमेकं समाधत्त।** **10x1=10**

1) “सहजं कर्म कौन्तेय” – “श्लोकं व्याख्याय कर्मत्यागासम्भवं शङ्कासमाधानाभ्यां विमृशत।

2) सन्यासत्यागशब्दार्थं निरुप्य विकल्पांश्च प्रदर्श्य विकल्पानां कर्मिविषयत्वमेव इति एतन्निरुपयत।

E) **द्वौ प्रश्नौ उत्तरत।** **1x2=2**

1) क्षेत्रक्षेत्रज्ञयोः कः सम्बन्धः?

2) त्रयोदशाध्याये समस्ताध्यायार्थोपसंग्रहार्थः श्लोकः कः?

F) **प्रश्नैकं प्रतिपादयत।** **3x1=3**

1) त्रयोदशाध्यायस्य आरम्भः किमर्थम्?

G) **द्वौ प्रश्नौ समाधत्त।** **5x2=10**

1) क्षेत्रक्षेत्रज्ञयोः स्वरूपम्।

2) “सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्” – इति श्लोकं परिपूर्य व्याख्यात।

***

RKMVERI/DSP/BMAIS/2019-24/J2021/SK-131

## SK-131 ब्रह्मसूत्रशाङ्करभाष्यम् (1-1,2 पादौ)

कालावधिः - होराद्वयम्                                                                 पूर्णांकाः -50

---

A) **यथेष्टं दशानां प्रश्ननानां समाधानं लिखत।** **1x10=10**

1) किमर्थं वेदान्ताः आरभ्यन्ते ?
2) ब्रह्मजिज्ञासा इति पदे का षष्ठी ?
3) जन्माद्यधिकरणे अस्येति पदेन कस्य ग्रहणम् ?
4) शास्त्रयोनित्वाधिकरणे प्रथमवर्णकविषयवाक्यं किम् ?
5) तत्तु समन्वयादित्यत्र तत्पदेन कस्य ग्रहणम् ?
6) अन्तरधिकरणस्य विषयवाक्यं किम् ?
7) आकाशाधिकरणस्य विषयवाक्यं किम् ?
8) प्राणाधिकरणस्य विषयवाक्यं किम् ?
9) शास्त्रदृष्ट्या उपदेशः कीदृशः ?
10) गुहाप्रविष्टाधिकरणे कौ द्वौ गृह्येते ?
11) अत्ता कः ?
12) पृथिवीं कः यमयति ?

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) पश्वादिभिश्चाविशेषात् - वर्णयत।
2) ब्रह्मजिज्ञासापदे षष्ठीविचारं कुरुत।
3) ब्रह्म प्रसिद्धम् उताप्रसिद्धमिति विचारयत।
4) शास्त्रयोनित्वाधिकरणे द्वितीयवर्णकं व्याख्यात।
5) गौणश्चेन्नात्मशब्दात् - सूत्रार्थं सप्रसङ्गं वर्णयत।
6) अत्रधिकरणसिद्धान्तं व्याख्यात।
7) अस्य गोर्द्वितीयोऽन्वेष्टव्यः - इत्यादिवाक्यं सप्रसङ्गं व्याख्यात।

C) **यथेष्टं त्रयाणां उत्तरं लिखत।** **5x3=15**

1) समन्वयाधिकरणदिशा मोक्षस्य उत्पाद्याद्यादिरूपत्वं निराकुरुत।

2) स्वाप्ययात् इति सूत्रार्थं विषयवाक्यसहितं वर्णयत।

3) आकाशाधिकरणे सिद्धान्तमालोचयत।

4) प्राणाधिकरणं विचारयत।

5) अन्तर्याम्यधिकरणं विमृशत।

D) **दीर्घप्रश्नैकम् उत्तरत ।** **10x1=10**

1) गुहाप्रविष्टाधिकरणं यथाभाष्यं व्याख्यात।

2) ईक्षत्यधिकरणं व्याख्यात।

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK-134

# SK-134 ब्रह्मसूत्रशाङ्करभाष्यम् (2.4, 3.1)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) प्राणस्य अणुत्वं नाम किम्?
2) सिद्धान्ते मुख्यप्राणः किंस्वरूपः?
3) देवताधिष्ठितत्वं वागादीनाम् इत्यत्र श्रुतिप्रमाणं किम्?
4) प्राणा अपि ब्रह्मविकारा एव इति कस्य मतम्?
5) योगशास्त्रप्रसिद्धाः मनसः वृत्तयः काः?
6) प्राणानां स्थूलत्वे को दोषः?
7) तृतीयाध्यायस्य प्रथमपादस्य कः विषयः?
8) अनुशयिनः जीवाः स्थावरशरीरेषु संश्लेषमात्रं गच्छन्ति, कुतः?
9) जीवाः अत्यल्पकालमेव आकाशादिभावेन अवस्थाय, भुवमापतन्ति, कुतः?
10) जीवस्य चन्द्रमण्डलादवरोहक्रमः कः?
11) देहान्तरप्रतिपत्तौ प्राणानां गतिबोधकश्रुतिः का?
12) पञ्चसु अग्निषु पञ्च आहुतयः काः भवन्ति?

B) **यथारुचि पञ्च सूत्राणि विव्रियन्ताम्।** **3x5=15**

1) गौण्यसम्भवात्।
2) पञ्चवृत्तिः मनोवद्व्यपदिश्यते।
3) वैशेष्यात्तु तद्वादस्तद्वादः।
4) भेदश्रुतेः।
5) प्राणवता शब्दात्।
6) भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) ज्योतिराद्यधिकरणम्।
2) प्राणोत्पत्त्यधिकरणम्।
3) इन्द्रियाधिकरणम्।
4) तदन्तरप्रतिपत्त्यधिकरणम्।
5) अन्याधिष्ठिताधिकरणम्।

D) **यथाभिमतम् एकं व्याख्यात।** **10x1=10**

1) वायुक्रियाधिकरणदिशा प्राणः किंस्वरूपः इति निरूपयत।
2) नामरूपव्याकर्तृत्वम् ईश्वरस्यैव इति संज्ञामूर्तिक्लृप्त्यधिकरणदिशा प्रसाधयत।

***

RKMVERI/DSP/BMAIS/17-22/J2022/SK-136

# SK-136 ब्रह्मसूत्रशाङ्करभाष्यम् (3.4,4)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **यथाकामं दश प्रश्नान् उत्तरत।** **1x10=10**

1) संन्यासस्य परामर्शमात्रत्वमिति कस्य मतम्?
2) आख्यानश्रुतयः किमर्थाः?
3) "तच्छ्रुतेः" इत्यत्र का श्रुतिः उदाहृता?
4) चतुर्विधाः ब्रह्मचारिणः के?
5) बृहदारण्यकश्रुतौ मौनं विधीयते, तत्कुतः?
6) पूर्वमीमांसकमतानुसारम् आत्मज्ञानस्य किं प्रयोजनम्?
7) ऐहिकाधिकरणस्य सिद्धान्तः कः?
8) प्रतीकेषु आत्मग्रहः न कर्तव्यः, किमर्थम्?
9) श्रवणादीनि किमर्थम् आवर्तनीयानि?
10) परमेश्वरम् आत्मत्वेनैव ग्राहयति श्रुतिः, इत्यत्र का श्रुतिः?
11) "स्मरन्ति च" इत्यत्र का स्मृतिः उदाहृता?
12) अग्निहोत्रादि तत्कार्यायैव भवति इत्यस्य कोऽर्थः?

B) **यथारुचि पञ्च सूत्राणि विव्रियन्ताम्।** **3x5=15**

1) अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्।
2) शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः।
3) विधिर्वा धारणवत्।
4) विशेषानुग्रहश्च।
5) इतरस्याप्येवमसंश्लेषः पाते तु।
6) यदेव विद्ययेति हि।
7) ब्रह्मदृष्टिरुत्कर्षात्।

C) **यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) सहकार्यन्तरविध्यधिकरणम्।
2) आश्रमकर्माधिकरणम्।
3) पारिप्लवाधिकरणम्।
4) आत्मत्वोपासनाधिकरणम्।
5) तदधिगमाधिकरणम्।

D) **यथाभिमतम् एकं व्याख्यात।** **10x1=10**

1) आवृत्त्यधिकरणदिशा "श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति" इति निरूपयत।
2) परामर्शाधिकरणमाश्रित्य बादरायणाचार्यस्य मतं यथाभाष्यं प्रकाशयत।

***

RKMVERI/DSP/BMAIS/2017-22/J2022/SK-137

## SK-137 संक्षेपशारीरकम्

कालावधिः - होराद्वयम् पूर्णांकाः -50

---

A) **यथेष्टं दशानां प्रश्नानां समाधानं लिखत।** **1x10=10**

1) परवस्तुनः अद्वितीयत्वं कथमुपपद्यते ?
2) भूमभावस्य कलुषीकरणेन कल्पिताः भेदाः के ?
3) कैः ज्ञानकाण्डमेव स्वार्थसमन्वितं विहितम् ?
4) सूक्ष्मतरङ्गाः के ?
5) प्रपञ्चधर्मव्यावृत्तिपरं सामान्यपदं विशेषपदं च किम् ?
6) किं मोक्षतत्त्वम् ?
7) प्रवृत्तिनिवृत्त्यधिकारिचिन्ता जैमिनीयशास्त्रे कस्मिन्नधिकरणे व्याख्याता ?
8) धर्मनिर्णयनिमित्तं किम् ?
9) तृतीयः श्लोकः पुंलिङ्गशब्दप्रयोगेण व्याख्यातः। तत्र श्रुतिप्रमाणं किम् ?
10) विश्वविवर्तहेतुः इति पदस्य द्वितीयवर्णकानुसारं अर्थः कः ?
11) अविद्या मृषा सत्यपि कथम् आच्छादयति विक्षिपति च ?
12) श्रवणादिशास्त्रमिदं किं शास्ति ?

B) **यथेष्टं पञ्चानां समाधानं कुरुत।** **3x5=15**

1) तदात्मवस्तुनि स्वयंप्रकाशे न ततोऽत्र मानधीः - व्याख्यात।
2) निवृत्तिभेदं व्याख्यात।
3) संक्षेपशारीरकग्रन्थस्य प्रकरणत्वं समर्थयत ।
4) द्वयोः निवृत्त्योः विधेयाविधेयत्वं व्याख्यात।
5) ब्रह्मणः प्रमेयत्वानङ्गीकारे वेदान्तवाक्यानामपि प्रमाणत्वभङ्गः - इति पूर्वपक्षिवाक्यं बोधयत।
6) सारसङ्ग्रहदिशा संक्षेपशारीरकोक्तां भाष्यकारप्रणामं व्याख्यात।
7) मुरारेः परमपदमित्यत्र बिम्बेश्वर-प्रतिबिम्बवादिनोः मतद्वयं किम् ?

C) **यथेष्टं त्रयाणां उत्तरं लिखत।** **5x3=15**

1) धर्मब्रह्मजिज्ञासाधिकारिणोः भेदं वर्णयत।

2) परमात्मनः प्रमाणावेद्यत्वे स्थलत्रयम् ।

3) विचारशास्त्रस्य किं प्रयोजनमिति ससारसङ्ग्रहं संक्षेपशारीरकमाश्रित्य वर्णयत।

4) प्रमाणदोषाभावेऽपि प्रमातृदोषसद्भावे न प्रमेयोपपत्तिः इति विषयं दृष्टान्तद्वयानुगुणेन व्याख्यात।

D) **दीर्घप्रश्नैकम् उत्तरत ।** **10x1=10**

1) उत्सर्गतः यद्यपि निवृत्तिरेवोपदिष्टं मुमुक्षोः, तथापि संक्षेपशारीरककारनये प्रवृत्तिनिवृत्युभयमेवोपदिष्टं मुमुक्षोः इति विषयमिमं सविशेषं निवृत्तिभेदवर्णनपुरःसरं व्याख्यात।

2) औत्पातिकी शक्तिरिति श्लोके शास्त्रयोनित्वाधिकरणमाश्रित्य वर्णकद्वये अर्थान् निरूपयत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK-141

# SK-141 चतुःसूत्री भामतीसहिता

समयावधि - होराद्वयम् पूर्णांकाः ५०

---

A) **अधोलिखितदशप्रश्नान् एकेन वाक्येन उत्तरत-** **1x10=10**

1) अविद्याद्वितयं नाम किम्?
2) भवस्य अङ्गानि कानि?
3) तिलकस्वामी इत्यत्र कः समासः?
4) एते वयमिमे इति प्रतीकग्रहणं कुतः?
5) विषयाः इत्यत्र को धातुः?
6) अध्यासः मिथ्येति भवितुं युक्तम् इत्यत्र मिथ्याशब्दार्थः कः?
7) सांव्यवहारिकं प्रामाण्यं नाम किम्?
8) अपच्छेदन्यायसूत्रं किम्?
9) शाब्दापरोक्षवादः कस्य राद्धान्तः।
10) केन न्यायेन षष्ठीपरिग्रहे कर्माद्यर्थानां ग्रहणं भवति?
11) अध्यासे व्याप्तिः का?
12) स्वर्गस्य नित्यत्वप्रतिपादिका श्रुतिः का?

B) **निम्नलिखितेषु पञ्चप्रश्नाः व्याख्यायन्ताम्-** **3x5=15**

1) जन्माद्यधिकरणस्य पातनिकां लिखत।
2) प्रधानग्रहलोकपालादीनां जगत्कारणत्वं निराकुरुत।
3) जगतः स्वरूपं वर्णयत।
4) षण्णां भावविकाराणां कथं त्रिषु एवान्तर्भावः इति निरूपयत।
5) मङ्गलश्लोकं व्याख्यात।
6) भामतीदिशा आत्मनः स्वरूपं वर्णयत।
7) ब्रह्मणः शास्त्रयोनित्वं निरूपयत।

C) **यथामति त्रयः समाधेयाः** **5x3=15**

1) अथशब्दस्य आरम्भवचनत्वं निराकृत्य आनन्तर्यार्थं निरूपयत।
2) स्मृतिरूपः परत्रपूर्वदृष्टावभासः इतीमां पङ्क्तिं भाष्यदिशा निरूपयत।
3) श्रुत्यादीनां प्रमाणां प्रवृत्यभावं प्रदर्शयत।
4) भामतीदिशा साधनचतुष्टयं विवेचयत।
5) प्रत्यक्षादिप्रमणापेक्षया आगमस्य प्राबल्य साधयत।

D) **अधस्तात् अनुप्रियम् एकं अनुबध्नीत** **10x1=10**

1) अथशब्दस्य क्रमवचनत्वं निराकृत्य आनन्तर्यार्थं निरूपयत। ।
2) ब्रह्मणः सन्दिग्धत्वं सप्रयोजनत्वं च सपूर्वपक्षं व्याख्यात।

***

RKMVERI/DSP/BMAIS/20-25/J2022/SK-161

# SK-161 वेदान्तसारः शाङ्करमध्यासभाष्यञ्च

कालावधिः- होराद्वयम् पूर्णाङ्काः ५०

---

**A) वाक्येनैकेन नीचैः प्रदत्तेषु दशप्रश्नानामुत्तरं लिखत** **1x10=10**

1) मङ्गलश्लोके ब्रह्मणः तटस्थलक्षणं किम्।
2) अभीष्टसिद्धये इत्यत्र कः अभीष्टः
3) आकाशादिव्यपदेशकारकं न्यायप्रमाणं किम्।
4) केषां कोशानां समन्वयेन सूक्ष्मशरीरमुत्पद्यते।
5) व्यवहारिकः जीवः कः।
6) किं चित्तम्।
7) जगदुत्पत्तौ चैतन्यं कदा निमित्तं कदा च उपादानकारणं भवति।
8) विक्षेपशक्त्या किं सिध्यति।
9) तुरीयं चैतन्यं महावाक्यस्य लक्ष्यं कदा भवति।
10) सूत्रात्मतैजसौ कैः सूक्ष्मविषयाननुभवतः।
11) प्राज्ञः अल्पज्ञः किमर्थम्
12) अध्यासभाष्यं कस्य उपोद्घातरूपेण रचितम्।

**B) यथारुचि इह पञ्च समाधत्त।** **3x5=15**

1) समाधेः कति अङ्गानि? कानि च तानि?
2) समाधिद्वयं वर्णयत।
3) षड्विधलिङ्गानि वर्णयत।
4) अज्ञानं वर्णयत।
5) प्रशान्तचित्ताय....इत्यादिश्लोकं वर्णयत।
6) लौकिकव्यवहारस्य आविद्यकत्वे अनुमानप्रमाणं किम्?
7) इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेण......स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते इति ग्रन्थभागमामूलचूडमुद्धरत।

C) **यथामन्त्रं निम्नदर्शितेषु त्रयः समाधेयाः।** **5x3=15**

1) तत्त्वमसीति महावाक्यस्य अखण्डत्वं वर्णयत।
2) सिद्धान्तानुसारेण अध्यासलक्षणं वर्णयत।
3) पञ्चीकरणं साधयत।
4) अधिकारिलक्षणं वर्णयत।
5) सूक्ष्मशरीरं वर्णयत।

D) **अधो विलिखितयोः एकं समाधत्त।** **10x1=10**

1) वेदान्तसारस्य मङ्गलं विशदयत।
2) शरीरत्रयं वर्णयत।

***

RKMVERI/DSP/BMAIS/20-25/J2022/SK-163

# SK-163 वेदान्तपरिभाषा (आगमान्तः भागः)

समयावधि-होराद्वयम् पूर्णांकाः ५०

---

A) **अधोलिखितदशप्रश्नान् एकेन वाक्येन उत्तरत-** **1x10=10**

1) ग्रन्थकर्तुः गुरोः नाम किम्?
2) त्रयाणां पुरुषार्थाम् अनित्यत्वं कथम् अवगम्यते?
3) वाक्यार्थबोधं प्रति कानि कारणानि?
4) अनुमाने कति अवयवाः सन्ति?
5) जीव ईशो-----इति कारिकां लिखत?
6) देहात्मप्रत्ययो------ इति कारिकां लिखत?
7) किं नाम विशेषणम्?
8) प्रातिभासिकत्वे किं प्रयोजकम्?
9) मायायाः एकत्वबोधिका श्रुतिः का?
10) शुक्तौ रजतनिषेधे कीदृशः अभावः अङ्गीक्रियते?
11) नैय्यायिकोक्तं तात्पर्यलक्षणं किम्?
12) तत्प्रतीतिजननयोग्यतावच्छेदकं किम्?

B) **निम्नलिखितेषु पञ्चप्रश्नाः व्याख्यायन्ताम्-** **3x5=15**

1) धारावाहिकबुद्धिस्थले कथम् अव्याप्तिः तन्निवृत्तिश्च?
2) चैतन्यस्य अनादित्वात् चक्षुरादेः तत्करणत्वेन कथं प्रमाणम्?
3) मनसः इन्द्रियत्वं निराकुरुत।
4) स्वाप्नादीनां मिथ्यात्वं साधयत।
5) अनुमितिलक्षणस्य परिष्कारं लिखत।
6) व्याप्तिलक्षणं व्याख्यात।
7) अजहल्लक्षणां निरूपयत।

C) **यथामति त्रयः समाधेयाः** **5x3=15**

1) यथाग्रन्थम् लक्षणां व्याख्यात।
2) लक्षणायाः वाक्यवृत्तित्वम् उपपाद्य अर्थवादवाक्येषु समन्वीत।
3) रजतादीनां साक्षिणि अध्यतत्वे कः दोषः किञ्च समाधानम्।
4) इन्द्रियजन्य-इन्द्रियाजन्यरूपेण प्रत्यक्षस्य द्वैविध्यं व्याख्यात।
5) बलाबलाधिकरणस्य सारांशं लिखत।

D) **अधस्तात् अनुप्रियम् एकम् अनुबध्नीत** **10x1=10**

1) तत्वमसि इति वाक्यस्थले लक्षणाप्रवृत्यप्रवृत्ती यथाग्रन्थं व्याख्यात।
2) प्रातिभासिकरजतस्थले पारमार्थिकत्वावगमे, अनवगमे च को दोषः, किञ्च समाधानम्।

***

RKMVERI/DSP/BMAIS/17-22/J2022/SK-173

# SK-173 अद्वैतसिद्धौ जरत्वहेतुविचारात् अविद्यालक्षणविचारं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **निम्नलिखितेषु दशप्रश्नान् उत्तरत।** **1x10=10**

1) सज्ञातृकत्वं ज्ञानजन्यत्वम् इति पक्षे को दोषः?
2) विशेषविषयत्वेन प्राबल्यम् इत्यत्र उदाहरणमेकं लिखत।
3) घटादयः स्वानुगतप्रतिभासे वस्तुनि कल्पिताः विभक्तत्वात्। विभक्तत्वं किंरूपम्?
4) मन्धरगामिनोऽपि कीदृशप्रमाणस्य प्राबल्यम्?
5) पूर्वसम्बन्धनियमे _______________ पूरयत।
6) अखण्डाकारवृत्तेः प्रामाण्यस्य मिथ्यात्वं केन रुपेण?
7) ज्ञानत्वेन साक्षात्तन्निवर्त्यत्वम् इत्यत्र साक्षात्पदप्रयोजनं किम्?
8) जीवचैतन्यस्य आवृतत्वपक्षे वृत्तिः किमर्था?
9) सत्यस्य असत्योपादानत्वे को दोषः?
10) अनादित्वविशिष्टाभावविलक्षणत्वेन अज्ञानस्य अनिवर्त्यत्वानुमाने क उपाधिः?
11) प्रतिहर्त्रुद्गात्रपच्छेदयोः नैमित्तिकं यथायथं लिखत।
12) जीवन्मुक्तौ कस्माद्बन्धनाशविलम्बः?

B) **पञ्चप्रश्नान् समाधत्त।** **3x5=15**

1) रजतभ्रमस्योपजीव्यत्वेऽपि प्राबल्याभावं दर्शयत।
2) अर्थाबाधरुपप्रामाण्यमिथ्यात्वे अर्थमिथ्यात्वापत्तिं दूरीकुरुत।
3) ब्रह्मणो द्रत्यत्वाभ्युपगमेऽपि न तद्ग्रहे रुपापेक्षा। उपपादयत।
4) अनुमानादिभ्यः प्रत्यक्षं जात्यैव प्रबलम्। - निराकुरुत।
5) सजातीयोपादानकत्वनियमं निराकुरुत।
6) अविद्यालक्षणस्य अभावोपादानाज्ञाने अव्याप्तिमाशङ्क्य परिहरत।
7) 'अस्ति ब्रह्म' - इत्यादौ कर्तरि लकाराभावमाशङ्क्य परिहरत।

C) **अधो दत्तेषु त्रीन् उत्तरत।** **5x3=15**

1) अन्यन्ताभावप्रतियोगित्वं देशतः परिच्छिन्नत्वम् – इत्यत्र शङ्कासमाधाने विवृणुत।

2) निरवकाशन्यायेन प्रत्यक्षस्य प्राबल्यम, एतन्निराकुरुत।

3) ज्ञानप्रामाण्यमिथ्यात्वं न विषयमिथ्यात्वप्रयोजकं विशदयत।

4) चिदुपरागार्था वृत्तिरिति पक्षमुपस्थापयत।

5) भावत्वाभावत्वयोः परस्परविरोधेऽपि दोषाभावम् उपपादयत।

D) **एकः प्रश्नः समाधेयः।** **10x1=10**

1) अविद्यालक्षणं शङ्कासमाधानाभ्यां विवृणुत।

2) प्रपञ्चमिथ्यात्वे परिच्छिन्नत्वहेतूपपत्तिं प्रकटयत।

***

RKMVERI/DSP/MAIS/20-25/J2022/SK–213

# SK-213 समासप्रकरणम्

कालः – होराद्वयम् पूर्णाङ्कः – 50

---

A) **यथेच्छं दश प्रश्नानुत्तरत।** **1x10=10**

1) यूपदारु इत्यत्र लौकिकविग्रहवाक्यं किम् ?
2) यावच्छ्लोकम् विग्रहः कः ?
3) पुरणगुण..इत्यादिसूत्रविहितः गुणनिषेधः कथमनित्यः ?
4) तृतीया तत्कृतार्थेन गुणवचनेन इति सूत्रे तत्कृत इत्यस्य किं प्रयोजनम् ?
5) द्विगोः तत्पुरुषसंज्ञा विधायकं सूत्रं किम् ?
6) मासावरः इत्यत्र केन सूत्रेण समासः ?
7) कः अन्वाचयः।
8) तीर्थकाकः इत्यत्र समासः केन।
9) पात्रेसमिताः इत्यस्य कः अर्थः।
10) स्त्रियाः पुंवद्... इत्यादिना सूत्रेण किं भवति।
11) विशेषणं विशेष्येण बहुलम् इत्यत्र बहुलग्रहणस्य किं फलम्।
12) अल्पाच्तरम् इत्यस्य एकम् उदाहरणं दीयताम्।

B) **यथेच्छं पञ्च प्रश्नान् समाधत्त।** **3x5=15**

1) उपकृष्णम् इति रूपं यथाग्रन्थं साधयत।
2) कृष्णश्रितः इति रूपं यथाग्रन्थं साधयत।
3) नदीभिश्च इति सूत्रं यथाग्रन्थं व्याख्यात।
4) तत्र तेनेदमिति सरूपे इत्यत्र सरूपे इत्यस्य किं प्रयोजनम्।
5) संख्यापूर्वो द्विगुः इत्यस्य अर्थं वर्णयत।
6) पुरुषव्याघ्रः इति रूपं साधयत।
7) द्वन्द्वे घि इति सूत्रं व्याख्यात।

C) **यथेच्छं त्रीन् प्रश्नान् समाधत्त।** **5x3=15**

1) कर्तृकरणे कृता बहुलम् इति सूत्रं यथाग्रन्थं व्याख्यात।
2) तृजकाभ्यां कर्तरि इति सूत्रं व्याख्यात।
3) अनेकमन्यपदार्थे इति सूत्रं व्याख्यात।
4) विशेषणं विशेष्येण बहुलम् इत्यस्य अपवादस्थलानि।
5) चार्थे द्वन्द्वः इति सूत्रं व्याख्यात।

D) **यथेच्छं एकम् उत्तरत।** **10x1=10**

1) पुरणगुण..इत्यादि सूत्रं पूर्णं विलिख्य यथाग्रन्थं व्याख्यात।
2) बहुव्रीहिसमासविधायकानां सूत्राणां सोदाहरणम् अर्थं प्रतिपादयत।

***

RKMVERI/DSP/BMAIS/2018-23/J2022/SK-216

## SK-216 सिद्धान्तकौमुद्यां तद्धितप्रकरणे अपत्याधिकारात् प्राग्वहतीयं यावत्

कालावधिः- होराद्वयम् पूर्णाङ्कः – 50

---

A) **नीचैः दत्तेषु दश प्रश्नान् उत्तरत।** **1x10=10**

1) दाण्डा इत्यस्य कोऽर्थः।
2) चत्वारः अर्थाः के।
3) यमाच्च इति कुत्र।
4) युवसंज्ञाविधायकमेकं सूत्रं लिखत।
5) क्रमादिभ्यः कः प्रत्ययः विधीयते।
6) कठेन प्रोक्तमधीयते इति विग्रहे किं रूपम्।
7) मातुलः इत्यत्र कः प्रत्ययः।
8) अद्यतनकालस्य कोऽर्थः।
9) वुञ्छणेत्यादिसूत्रं पूरयत।
10) निवासः कः।
11) सायंतनम् इत्यत्र केन सूत्रेण कः प्रत्ययः विधीयते।
12) शम्याः कः प्रत्ययः भवति।

B) **अधो लिखितेषु पञ्च समाधत्त।** **3×5 = 15**

1) गार्ग्यायणः इति रूपं साधयत।
2) वैयासकिः इति रूपं साधयत।
3) कन्यायाः कनीन च इति सूत्रं व्याख्यात।
4) ब्राह्मो जातौ इति सूत्रं व्याख्यात।
5) विशेषणानां चाऽजातेः इति सूत्रं व्याख्यात।
6) तस्य विकारः इति सूत्रं व्याख्यात।
7) प्राग्वहतेष्ठक् इति सूत्रं व्याख्यात।

C) **अधो लिखितेषु त्रयः समाधेयाः।** **5×3 = 15**

1) एको गोत्रे इति सूत्रं व्याख्यात।
2) अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः इति सूत्रं व्याख्यात।
3) वामदेवाड्ड्यड्ड्यौ इति सूत्रं व्याख्यात।
4) घञः सास्यां क्रियेति ञः इति सूत्रं व्याख्यात।
5) अभिजनेऽर्थे प्रत्ययविधायकानि त्रीणि सूत्राणि व्याख्यात।

D) **अधः प्रदत्तयोः एकः प्रश्नः समाधेयः।** **10x1=10**

1) तस्यापत्यम् इति सूत्रं व्याख्यात।
2) समूहेऽर्थे प्रत्ययविधायकानि सूत्राणि आश्रित्य प्रबन्धमेकं रचयतु।

***

## SK-218 सिद्धान्तकौमुद्यां तद्धितप्रकरणे प्राग्घितीयात् द्विरुक्तं यावत्

कालावधिः- होराद्वयम् पूर्णाङ्काः- ५०

---

A) **यथेच्छं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) वश्यशब्दस्य कोऽर्थः?
2) प्रासङ्गो नाम कः?
3) संज्ञायां धेनुष्या इति सूत्रस्यार्थं लिखत।
4) आचार्यभोगीनः इत्यत्र णत्वं कुतो न?
5) गार्हपत्यः इत्यत्र कः प्रत्ययः, केन?
6) चित्तवति नित्यम् इति सूत्रस्यार्थं लिखत।
7) शून्यम् इत्यत्र दीर्घः केन?
8) उत्पातो नाम किम्?
9) वातिकम् इत्यत्र केन ठक्प्रत्ययः?
10) दण्डी इत्यत्र इनिप्रत्ययः केन?
11) जाड्यम् इत्यत्र कः प्रत्ययः केन?
12) अधुना इत्यत्र कः प्रत्ययः?

B) **यथाकामं पञ्च समाधत्त।** **3x5=15**

1) वैंशतिकम् इति रूपं साधयत।
2) सार्वभौमः इति रूपं साधयत।
3) पारिखेयी इति रूपं साधयत।
4) तेन तुल्यं क्रिया चेद्वतिः इति सूत्रं व्याख्यात।
5) माणवीनम् इति रूपं साधयत।
6) शारदम् इति रूपं साधयत।
7) नान्तादसंख्यादेर्मट् इति सूत्रं व्याख्यात।

C) **यथाकामं त्रीन् समाधत्त।** **5x3=15**

1) नौवयोधर्म.... इति सूत्रं व्याख्यात।

2) आत्मन्विश्वजनभोगोत्तरपदात्खः इति।

3) तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते इति सूत्रं व्याख्यात।

4) बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् इति सूत्रं व्याख्यात।

5) द्विवचनविभज्योपपदे तरबीयसुनौ इति सूत्रं व्याख्यात।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) तत्र साधुः इत्यस्मिन् अर्थे प्रत्ययान् विवृणुत।

2) भूमनिन्दाप्रशंसासु इत्यादिकारिकां व्याख्यात।

***

RKMVERI/DSP/BMAIS/19-24/J2022/SK-221

# SK-221 भ्वादिप्रकरणम्

कालावधिः- होराद्वयम् पूर्णाङ्कः- ५०

---

A) **यथेष्टं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) पाधातोः पिबादेशः केन भवति ?
2) एधते इत्यत्र एत्वं केन सूत्रेण क्रियते ?
3) अजन्तोऽकारवान् वा… इति सम्पूर्णां कारिकां लिखत ?
4) वचिस्वपियजादीनां किति इति सूत्रेण किं क्रियते ?
5) चङि इति सूत्रेण किं विधीयते ?
6) आनर्द इत्यत्र केन सूत्रेण नुडागमः भवति ?
7) भूधातोः विधिलिङि प्रथमपुरुषैकवचने किं रूपं सिध्यति ?
8) स्वरतिसूतिसूयतिधूञूदितो वा इति सूत्रस्य कोऽर्थः ?
9) एध्-धातोः लङि प्रथमपुरुषैकवचने किं रूपम् ?
10) लृङ्-लकारस्य विधानं केन भवति ?
11) गच्छति इत्यत्र केन सूत्रेण छत्वं भवति ?
12) घुसंज्ञाविधायकं सूत्रं किम् ?

B) **यथेष्टं पञ्च समाधत्त।** **3x5=15**

1) अभूत् इति रूपं साधयत।
2) लिङ्-लकारस्य प्रयोगः केषु अर्थेषु भवति सोदाहरणं विस्तृणुत।
3) एधेरन् इति रूपं साधयत।
4) "वुकोऽसिद्धत्वादुवङि प्राप्ते वुग्युटोवुवङ्यणोः सिद्धौ वक्तव्यौ" इति व्याख्यायताम्।
5) देधे (प्रथमपुरुषैकवचनम्) इति रूपं ससूत्रं निरूपयत।
6) बभूविथ इति रूपं साधयत।
7) कामयते इति रूपं साधयत।

C) **यथेष्टं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रं व्याख्यायताम्।
2) गोपायाञ्चकार इति रूपं साधनीयम्।
3) तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति सूत्रं व्याख्यायताम्।
4) णेरनिटि इति सूत्रं व्याख्यायताम्।
5) लः कर्मचि च भावे चाकर्मकेभ्यः इति सूत्रं विवर्णयत।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) अतो येयः इति सूत्रं यथाग्रन्थं विस्तृणुत।
2) लिटि इडागमव्यवस्थां निरूपयत।

***

RKMVERI/DSP/BMAIS/19-24/J2022/SK-223

## SK-223 सिद्धान्तकौमुद्याम् अदादितः णिजन्तपर्यन्तम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) अख्यत् इत्यत्र अङादेशः केन भवति।
2) अद्धि इत्यत्र ध्यादेशः केन सूत्रेण।
3) श्लौ इति सूत्रेण किं विधीयते।
4) ग्रहीता इत्यत्र दीर्घः केन सूत्रेण।
5) निष्काषिता/निष्कोष्टा इत्यत्र विकल्पेन इडागमः केन सूत्रेण भवति।
6) पुनाति इत्यत्र ह्रस्वः केन सूत्रेण सञ्जातः।
7) संस्करोति इत्यस्य कः अर्थः।
8) नित्यं करोतेः इति सूत्रेण कस्य लोपः भवति।
9) रुधादिप्रकरणे कः विकरणप्रत्ययः भवति।
10) गिलति इत्यत्र लत्वं केन सूत्रेण।
11) गणकार्यमनित्यम् इत्यत्र किं लिङ्गम्।
12) "अयमन्तिपरो न प्रयुज्यते" इति कस्य धातोः विषये उच्यते ग्रन्थकृद्भिः।

B) **अधोलिखितेषु यथारुचि पञ्च समाधत्त।** **3x5=15**

1) श्नतसोरल्लोपस्याभीयत्वेनासीद्धत्वादाट् – पङ्क्त्यर्थः परिष्क्रियताम्।
2) रूदादिभ्यः सार्वधातुके इति सूत्रं व्याख्यात।
3) रूपं साधयत – अवोचत्।
4) मुञ्चति इति प्रयोगं सूत्रनिर्देशपुरस्सरं वर्णयत।
5) देहि इति प्रयोगं ससूत्रं निष्पादयत।
6) ससीतयो राघवयोरधीयन् – इति प्रयोगेण किं दर्शितं ग्रन्थकृता, सप्रसङ्गं व्याख्यात।
7) आभीयतया जस्यासिद्धत्वाद्धेर्न लुक्।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) सूत्रं व्याख्यात – न न्द्राः संयोगादयः
2) अध्यगीष्ट इति रूपं साधयत।
3) जाग्रोऽविचिण्णल्ङित्सु इति सूत्रं यथाशास्त्रं व्याकुरुत।
4) दीङो युडचि क्ङिति इति सूत्रं व्याख्यात।
5) जुहवाञ्चकार इति प्रयोगं ससूत्रं साधयत।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) घ्वसोरेद्धावभ्यासलोपश्च इति शास्त्रं सोदाहरणं यथाग्रन्थं व्याकुरुत।
2) तुरुस्तुशम्यमः सार्वधातुके इति शास्त्रं सोदाहरणं व्याख्यात।

***

# SK-225 सिद्धान्तकौमुद्यां सन्नन्ताल्लकारार्थं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) परस्मैपदसंज्ञाविधायकं सूत्रं किम् ?
2) परिमृष्यति इत्यत्र केन परस्मैपदम् ?
3) रथिकान् उपतिष्ठते इत्यस्य कः अर्थः ?
4) भावकर्मणोः इत्यस्य किमुदाहरणम् ?
5) विपराभ्यां जेः इत्यस्य किमुदाहरणम् ?
6) गन्धनं नाम किम् ?
7) हरतेरप्रतिषेधः इत्यस्य किमुदाहरणम् ?
8) सन्यतः इति सूत्रेण किं भवति ?
9) सनः आर्धधातुकसंज्ञा केन भवति ?
10) जीवति अत्र धातुः सकर्मकः नवा ?
11) चिकीषति इत्यत्र केन कुत्वम् ?
12) वितपते इत्यत्र आत्मनेपदं केन ?

B) **अधोलिखितेषु यथारुचि पञ्च प्रयोगान् समाधत्त।** **3x5=15**

1) गव्यति।
2) पच्यते।
3) पिपठिषति।
4) जिघत्सति।
5) भाविष्यते।
6) शोशुभ्यते
7) बभूवे।

C) **अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1) धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रं व्याख्यात।
2) सनि च इति सूत्रस्य व्याख्यां लिखत।
3) स्यसिच्सीयुट्........ इति सूत्रस्य व्याख्यां कुरुत।
4) शैषिकान्मतुबर्थी.... इति कारिकां विलिख्य व्याख्यात।
5) दीर्घोऽकितः इति सूत्रं यथाग्रन्थं प्रतिपादयत।

D) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) न धातुलोप आर्धधातुके इति सूत्रं सोदाहरणं सपदकृत्यं वर्णयन्तु।
2) हलन्ताच्च इति सूत्रं सोदाहरणं सपदकृत्यं यथाग्रन्थं प्रतिपादयन्तु।

***

# SK-228 सिद्धान्तकौमुद्याम् उत्तरकृदन्तप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) प्रश्रयः इत्यत्र कः कृत्प्रत्ययः?
2) सृ स्थिरे इति सूत्रे सृ इत्यत्र का विभक्तिः?
3) आतश्चोपसर्गे इत्यनेन कः प्रत्ययः?
4) घञपोश्च इति सूत्रस्यार्थं लिखत?
5) रादिफः इति वार्तिकेण कः प्रत्ययः विधीयते? किञ्चोदाहरणम्?
6) स्थागापापचो भावे इति सूत्रेण विहितः क्तिन्प्रत्ययः कस्यापवादः?
7) प्रथने वावशब्दे इति सूत्रस्यार्थं लिखत?
8) ण्यासश्रन्थो युच् इत्यनेन विहितः युच् कस्य अपवादः?
9) अण् कर्मणि च इति सूत्रेण विहितः अण्प्रत्ययः कस्यापवादः?
10) श्रायः इत्यत्र कः प्रत्ययः?
11) स्वप्नः इत्यत्र केन सूत्रेण कः प्रत्ययः।
12) उद्ग्राहः इत्यत्र केन घञ्।

B) सप्तसु पञ्च समाधत्त। **3x5=15**

1) तेनेह न- 'भूतानि कालः पचतीति वार्ता'।" इति पङ्क्तिं व्याख्यात।
2) श्रायः इति रूपं साधयत।
3) "स्त्रियां क्तिन्" इति सूत्रं व्याख्यात।
4) "अत्र वाऽसरूपेण तृजादयो न, पुनर्ण्वुलुक्तेः" इति पङ्क्तिं व्याख्यात।
5) रागः इति रूपं साधयत।
6) "अण् कर्मणि च" इति सूत्रं व्याख्यात।
7) "स्थागापापचो भावे" इति सूत्रं व्याख्यात।

C) पञ्चसु त्रीन् समाधत्त। **5x3=15**

1) "वा ल्यपि" इति सूत्रं व्याख्यात।

2) "स्वादुमि णमुल्" इति सूत्रं व्याख्यात ।

3) "समानकर्तृकयोः पूर्वकाले" इति सूत्रं व्याख्यात।

4) "समासेनञ्पूर्वे क्त्वो ल्यप्" इति सूत्रं व्याख्यात।

5) "कर्तृकर्मणोश्च भूकृञोः" इति सूत्रं व्याख्यात।

D) द्वयोरेकं समाधत्त। **10x1=10**

1) तुमुन्प्रत्यपविधायकानि सूत्राणि व्याख्यात।

2) निवासचितिशरीरोपसमाधानेष्वादेश्च कः सङ्घे चानौत्तराधर्ये चेति सूत्रे व्याख्यात।

***

RKMVERI/DSP/BMAIS/21-26/J2022/SK-237

# SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तस्त्रीलिङ्गादिप्रकरणं

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **अधोलिखितेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) हे अम्ब इत्यत्र केन सूत्रेण ह्रस्वः?
2) तिसृचतसृ एतयोः ऋकारस्य रेफादेशः केन सूत्रेण भवति?
3) ज्ञानानि इत्यत्र नुम् केन सूत्रेण भवति?
4) हे वारे इत्यत्र न लुमताङ्गस्य इत्यनेन गुणनिषेधः कुतो न?
5) दध्ना इत्यत्र अनङ् केन सूत्रेण?
6) को नाम अन्वादेशः?
7) अष्टौ इत्यत्र औश् केन सूत्रेण?
8) युष्मत् इत्यत्र भ्यसोऽत् केन सूत्रेण?
9) त्र्यनीका इत्यत्र द्विगोः इति सूत्रेण ङीप् कथं न?
10) इन्द्रवरुण.–इत्यादिसूत्रं पूरयत।
11) ङीन्प्रत्ययविधायकं सूत्रं लिखत?
12) जीवसे इत्यस्य अव्ययसंज्ञा केन सूत्रेण भवति?

B) **यथारुचि सप्तसु पञ्चानां ससूत्रं रूपं साधयत। 3x5=15**

1) रमायै
2) दध्नि
3) युष्मान्
4) असौ
5) उपानत्
6) कुरुचरी
7) दाक्षी

C) **यथाकामं पञ्चसु त्रयः समाधेयाः।** **5x3=15**

1) ङिति ह्रस्वश्च इति सूत्रं व्याख्यात।

2) इकोऽचि विभक्तौ इति सूत्रं व्याख्यात।

3) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति इति सूत्रं व्याख्यात।

4) षिद्गौरादिभ्यश्च इति सूत्रं व्याख्यात।

5) वष्टि भागुरिरित्यादिश्लोकं पूरयित्वा व्याख्यात।

D) **अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) नदीसंज्ञाप्रकरणं वर्णयत।

2) प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रं सोदाहरणं व्याख्यात।

***

RKMVERI/DSP/BMAIS/21-26/J2022/SK-238

# SK-238 लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्

कालः - होराद्वयम् पूर्णाङ्काः -50

---

A) **नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) छन्दमात्रगोचरः कः लकारः?
2) अकर्मकेभ्यः धातुभ्यः कस्मिन्नर्थे लकाराः भवन्ति?
3) तिप्तस्झि...इति सूत्रं पूरयतु।
4) परस्मैपदसंज्ञाविधायकं सूत्रं लिखत।
5) आयप्रत्ययविधायकं शास्त्रं किम्?
6) णिजन्तधातोः आत्मनेपदप्रत्ययाः विधीयन्ते केन सूत्रेण?
7) भुज्धातोः कस्मिन्नर्थे आत्मनेपदं न भवति?
8) श्नाविकरणप्रत्ययः विधीयते कस्मिन् गणे?
9) कुर् + व्+ अन्ति - हलि च इत्यनेन दीर्घः कथन्न प्रवर्तते?
10) तृणहः श्नमि कृते हलादौ पिति सार्वधातुके कः आगमः भवति?
11) जनी प्रादुर्भावे इति धातोः लटि प्रथमपुरुषैकवचने किं रूपं सिध्यति?
12) विध्यति इत्यत्र संप्रसारणविधायकं शास्त्रं किम्?

B) **अधोलिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1) भव इति प्रयोगं ससूत्रं निरूपयत।
2) जहीहि इति प्रयोगं ससूत्रं साधयत।
3) मिमीते इति रूपं ससूत्रं लिखत।
4) चिकाय इति रूपं ससूत्रं प्रपञ्चयत।
5) लः कर्मणि चाकर्मकेभ्यः इति सूत्रं संक्षेपेण व्याख्यात।
6) हलः श्नः शानज्झौ इति सूत्रं स्पष्टयत।
7) जनिवध्योश्च इति सूत्रं सोदाहरणं लिखत।

A) **अत्र यथेष्टं त्रयं समाधत्त** **5x3=15**

1) तुह्योस्तातङाशिष्यान्यतरस्यामिति सूत्रं ग्रन्थदिशा व्याख्यात।
2) सिचि वृद्धिः परस्मैपदेष्विति सूत्रं यथाग्रन्थं विशदयत।
3) रूपं साधय – पिपूर्तः ।
4) बभुविथ इति प्रयोगं संसाधयत।
5) चोरयति इति रूपं ससूत्रं निरूपयत।

B) **निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1) अचीकमत इति रूपं ससूत्रं साधयत।
2) अत एकहल्मध्येऽनादेशादेर्लिटि इति सूत्रं यथा ग्रन्थं व्याख्यात।

***

RKMVERI/DSP/BMAIS/17-22/J2022/SK-243

# SK-243 महाभाष्ये 8,9 आह्निके

कालावधिः- होराद्वयम् पूर्णाङ्कः- 50

---

A) **यथेष्टं दशप्रश्नाः समाधेयाः।** **1x10=10**

1) स्थानिवत्सूत्रे आदेशग्रहणं विना कथं तदर्थप्रतिपत्तिः ?
2) विशेषणत्वेनालाश्रीयते तत्र अनल्विधौ प्रतिषेधस्य किमुदाहरणम् ?
3) आदेशिन्यल्याश्रीयमाणे प्रतिषेधे क्व दोषः ?
4) भित्ताद् इत्यत्र स्थानिवद्भावेन प्राप्तधित्वं कथं वारितः ?
5) स्वविधौ स्थानिवद्भावे सति कथं देयम् इत्यस्य सिद्धिः ?
6) हलचोरादेशे स्थानिवद्भावे सति क्व दोषः ?
7) वेतस्वान् इत्यस्य दोषवारणं कथं कृतं भगवता ?
8) न पदान्त.. इत्यत्र यलोपे किमुदाहरणम् ?
9) चङ्परनिर्ह्रासे किमुदाहरणम् ?
10) गाङः प्रतिषेधः कथं समाहितः ?
11) लुक्श्लुलुपः सर्वादेशाः कथं भवन्ति ?
12) प्रयोजनमपृक्तशिलोपे नुममामौ.. इत्यत्र गुणस्य उदाहरणं किम् ?

B) **यथेष्टं पञ्च समाधत्त।** **3x5=15**

1) स्थानिवत्सूत्रे वत्करणं किमर्थम् ?
2) सत्याश्रये विधिरिष्टः इति वार्तिकं सप्रसङ्गं लिखत।
3) पूर्वत्रासिद्धे च इति वार्तिकं निरूपयत।
4) अचः परस्मिन्नित्यत्र पूर्वविधाविति ग्रहणं किमर्थं विस्तरत।
5) अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः इति वार्तिकं निरूपयत।
6) अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य इति वार्तिकं वर्णयत।
7) कंसीयपरशव्ययोर्विशिष्टनिर्देशात् सिद्धम् इति निरूपयत।

C) **यथेष्टं प्रश्नत्रयं समाधत्त।** **5x3=15**

1) किं पुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवति, आहोस्विदविशेषेण आदेशे आदेशिनि च ?

2) अचः पूर्वविज्ञानादैचोः सिद्धम् इति वार्तिकं व्याख्यात।

3) क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् इति वार्तिकं निरूपयत।

4) ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य इति वार्तिकं सप्रसङ्गं वर्णयत।

5) प्रत्ययस्य लुक्श्लुलुपः इति सूत्रं यथाभाष्यं व्याख्यात।

D) **अन्यतरं समाधत्त।** **10x1=10**

1) स्थानिवत्सूत्रसत्वे के दोषाः यथाग्रन्थं विस्तरत।

2) न पदान्त इत्यस्य कर्मसाधनभावसाधनत्वयोः निरूपणं कुरुत।

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK-257

# SK-257 परिभाषेन्दुशेखरः

समयावधिः-होराद्वयम् | पूर्णाङ्काः-५०

---

A) **दश समाधेयाः** **1x10=10**

1) प्रकल्प्य चापवादविषयम् इत्यत्र प्रकल्प्य इत्यस्य कोऽर्थः?
2) तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इत्यत्र किं मानम्?
3) चानुकृष्टं नोत्तरत्र इति परिभाषायाः ज्ञापकं किम्?
4) मासे दीयते इत्यत्र कीदृशी सप्तमी?
5) मातृशब्देन शुद्धरूढस्य एव ग्रहणम् इत्यत्र किं मानम्?
6) अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे इत्यत्र स्वार्थे इत्यस्य कोऽर्थः?
7) सन्नियोगशिष्टपरिभाषा कुत्र ज्ञापिता?
8) तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इत्यत्र किं मानम्?
9) विधिनियमसम्भवे कस्य ज्यायस्त्वम्?
10) पूर्वत्रासिद्धीयमद्वित्वे इति परिभाषाया लिङ्गं किम्?
11) सन्नियोगशिष्टपरिभाषा कुत्र ज्ञापिता?
12) ताच्छीलिके णेऽण्कृतानि भवन्ति इत्यस्य प्रयोजनान्तरं किम्?

B) **यथाभीष्टं पञ्च परिभाषाः व्याख्यात** **3x5 = 15**

1) प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते।
2) पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः।
3) ताच्छीलिकेषु वासरूपविधिर्नास्ति।
4) प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः।
5) बाधकान्येव निपातनानि।
6) व्यवस्थितविभाषयाऽपि कार्याणि भवन्ति।
7) पूर्वत्रासिद्धीयमद्वित्वे।

C) **यथाभीष्टं तिस्रः परिभाषाः व्याख्यात** **5x3=15**

1) हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् इति परिभाषां व्याख्यात।

2) गामादाग्रहणेष्वविशेषः इति परिभाषां व्याख्यात।

3) निषेधाश्च बलीयांस  इति परिभाषां व्याख्यात।

4) क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति इति परिभाषां व्याख्यात।

5) साम्प्रतिकाभावे भूतपूर्वगतिः इति परिभाषां व्याख्यात।

D) **यथाभीष्टम् एकां परिभाषां व्याख्यात** **10x1=10**

1) सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य।

2) स्वरविधौ व्यञ्जनम् अविद्यमानवत्

***

RKMVERI/DSP/BMAIS/18-23/J2022/SK–266

## SK–266 लघुशब्देन्दुशेखरे अजन्तभागः

कालः – होराद्वयम् पूर्णाङ्कः - 50

---

A) **यथेच्छं दश प्रश्नान् उत्तरत।** **1x10=10**

1) अर्थवत्त्वं कीदृशं विवक्षितम् ?
